कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M737. विषय स्तोत्र

नाव. भवानिसहस्रनाम.

लेखक/लिपीकार भवानिभट्ट थोपटे

पृष्ठ 46 काळ शके १७२५ पूर्ण/अपूर्ण

॥इदंपुस्तकंभवाणिसहस्रनामप्रारंभः॥

॥पत्र ७६॥

॥श्रीगणेशायनमः॥श्रीभवानीशंकरायनमः॥
कैलासशिखरेरम्येदेवदेवंमहेश्वरं॥ध्या
नोपरतमासीनंप्रसंन्नमुखपंकजं॥१॥
सुरासुरशिरोरत्नरंजिताघ्रियुगंशुभं॥
प्रणम्यनंदिकोदेवंबद्धांजलिरभाषत॥२॥

नंदिकेश्वरउवाच॥देवदेवजगंनाथसंश
योस्तिमहान्मम॥रहस्यंप्रष्टुमिछामिकिंचि
त्वांभक्तवत्सल॥३॥देवतायास्त्वयाकस्या
स्तोत्रमेतद्दिवानिशं॥पठ्यतेचरितंना
थत्वतःकिमपरंपरं॥४॥इतिपृष्टस्तथाशं

स. स.

मुनंदिकेनजद्गुरुः॥ प्रोवाचभगवानीशो
विलसन्नेत्रपंकजः॥५॥ ईश्वरउवाच॥
साधुसाधुगणश्रेष्ठपृष्टवानसिमांचयत्
॥स्कंदस्यापिहियद्गोप्यंरहस्यंकथयामिते
॥६॥पुराकल्पक्षयेलोकान्सिसृक्षुर्मूढचे

तनः॥गुणत्रयमयीशक्तिर्मूलप्रकृतिसंज्ञिता
॥७॥हेतुःसंकल्पजालस्यमनोधिष्ठायिनी
शुभा॥इछेतिपरमाशक्तिरुन्मीलिततः
परं॥८॥तस्यामहंसमुत्पन्नस्तत्त्वैस्तैर्महदा
दिभिः॥चेतनेतिततःशक्तिर्मांकाप्यालिंग्य

स. २ स. ३

तस्थुषी॥९॥ततोवागितिविख्याताःशक्तिः
शंब्दमयीपुरा॥प्रादुरासिज्जगन्मातावेद
मातासरस्वती॥१०॥ब्राह्मीचवैष्णवीरौ
द्रीकौमारीपार्वतीशिवा॥सिद्धिदाबुद्धि
दात्रींतासर्वमंगलदायिनी॥११॥तयैतत्सृ

ज्यतेविश्वमनाधारंतुधार्यते॥तयैतत्पाल्यते
विश्वंतस्यामेवप्रलीयते॥१२॥अर्चिताप्रण
ताध्यातासर्वभावनिश्चितैः॥आराधिता
स्तुतासैवसर्वसिद्धिप्रदायिनी॥१३॥तस्य
१४ ह्यनुग्रहाद्देवतामेवस्तुतवानहं॥सहस्रैर्नां

मस्त्रिदिव्यैस्त्रैलोक्यप्राणिप्रजितैः॥१४॥स्तवे
नानेन संतुष्टा मामेव प्रविवेश सा॥तदारभ्य
मया प्राप्तमयैश्वर्यपदमुत्तमं॥१५॥तत्प्रभा
वान्मया सृष्टं जगदेतच्चराचरं॥ससुरासुर
गंधर्वयक्षराक्षसमानवं॥१६॥सपन्नगंस
मुद्रं च सशैलवनकाननं॥सरात्रिग्रहन
क्षत्रं पंचभूतगुणान्वितं॥१७॥नंदिन्ना
मसहस्रेण स्तवेनानेन सर्वदा॥स्तौमि तां
परमां शक्तिं ममानुग्रहकारिणीं॥१८॥इत्यु
क्त्वोपरतं देवं चराचरगुरुं प्रभुं॥प्रणम्य

शिरसा नंदी प्रोवाच परमेश्वरं ॥१९॥ नंदिकेश्वरउवाच ॥ भगवन् देवदेवेश लोकनाथ जगत्प्रभो ॥ भक्तोस्मितव दासोस्मि प्रसादः क्रियतां मम ॥२०॥ देव्यास्तवमिदं पुण्यं दुर्लभं यत्सुरैरपि ॥ श्रोतुमिच्छाम्यहं देव प्रभा

वमपि चास्य च ॥२१॥ ईश्वरउवाच ॥ शृणु नंदिन्महाभाग स्तवराजमिदं शुभं ॥ सहस्रैर्नामभिर्दिव्यैः सिद्धिदं सुखमोक्षदं ॥ शुचिभिः प्रातरुत्थाय पठितव्यं समाहितैः ॥ त्रिकालं श्रद्धया युक्तै नातः परतरस्तवः ॥२२॥ ॐ अस्य श्री

भ.

६

भवानीसहस्त्रनामस्तोत्रमंत्रस्य॥श्रीभगवान्
महादेवऋषिः॥आद्याशक्ति॥श्रीभवानीदेव
ता॥अनुष्टुपछंदः॥ॐह्रींबीजं॥क्लींकिलकं॥
ॐसैाःशक्तिः॥आद्याशक्तिर्भगवतीभवा
नीप्रीत्यर्थंजपेविनियोगः॥ॐह्रींश्रींक्लींबी

५.

६

जत्रयायविद्महेमहामायायधीमही॥
तन्नोशक्तिःप्रचोदयात्॥अथन्यासः॥ॐह्रां
महाविद्यायैअंगुष्ठाभ्यांनमः॥ॐह्रींजगन्मा
त्रेतर्जनीभ्यांनमः॥ॐह्रूंमहालक्ष्म्यैमध्यमा
भ्यांनमः॥ॐह्रैंशिवप्रियायैअनामिकाभ्यां

नमः॥ ॐ ह्रौं विष्णुमायायै कनिष्ठिकाभ्यां नमः॥
ॐ ह्रः शुभायै करतलकरपृष्ठाभ्यां नमः॥ ॐ ह्रां
महाविद्यायै हृदयाय नमः॥ ॐ ह्रीं जगन्मात्रे
शिरसे स्वाहा ४॥ ॐ ह्रूं महालक्ष्म्यै शिखायै वष
ट्॥ ॐ ह्रैं शिवप्रियायै कवचाय हुं॥ ॐ ह्रौं विष्णु

मायायै नेत्रत्रयाय वौषट्॥ ॐ ह्रः शुभायै अ
स्त्राय फट्॥ अथ ध्यानं॥ रक्ताभामरुणांशु
कांबरधरामानंदपूर्णाननां मुक्ताहारविभू
षणां कुचभराक्रांतां सकांचीगुणां॥ देवीं
दिव्यरसान्नपूर्णकलशां मंभोजदर्वीकरां

भ. स.

८

ध्यायेच्छंकरवल्लभांत्रिनयनांमंबांप्रलंबाल
कां॥२५॥ ॐह्रींश्रींक्लीं॥ ॐ महाविद्याजगंमा
तामहालक्ष्मीशिवप्रिया॥ विष्णुमायाशुभा
शांतासिद्धासिद्धसरस्वती॥२६॥ क्षमाकांतिः
प्रभाजोत्स्नापार्वतीसर्वमंगला॥ हिंगुळाचं

८

डिकादांतापद्मालक्ष्मीर्हरिप्रिया॥२७॥ त्रिपु
रानंदिनीनंदासुनंदासुरवंदिता॥ यज्ञविद्या
महामायावेदमातासुधाधृतिः॥२८॥ प्रीतिः
प्रियाप्रसिद्धाचमृडानीविंध्यवासिनी॥ सि
द्धिर्विद्यामहाशक्तिःपृथ्वीनारदसेविता॥२९॥

दु॰ | स॰

कां।

पुरुहूतप्रियाप्रीतिः कामिनी पद्मलोचना ॥ प्रह्ला
दिनी महामाता दुर्गा दुर्गार्तिनाशनी ॥ ३० ॥
ज्वालामुखी सुगोत्रा च ज्योतिः कुमुदहासि
नी ॥ दुर्गमा दुर्लभा विद्या स्वर्गतिः पु
रवासिनी ॥ ३१ ॥ अपर्णा शाबरी माया मदि

रा मृदुहासिनी ॥ नारायणी महानिद्रा योगनि
द्रा प्रभावती ॥ ३२ ॥ प्रज्ञा पारमिता प्राज्ञा तारा म
धुमती मधुः ॥ क्षीरार्णवसुताहारा कालिका
सिंहगामिनी ॥ ३३ ॥ ॐकारा च सुधाकारा चे
तना कोपनाकृतिः ॥ अर्धबिंदुधराधारा वि

श्वमाताकलावती॥३४॥पद्मावतीसुवस्त्या
चप्रच्छाचसरस्वती॥कुंडासनाजगद्धात्री
बुद्धमाताजिनेश्वरी॥३५॥जिनमाताजिनेंद्रा
चशारदाहंसवाहिनी॥राज्यलक्ष्मीर्वषट्का
रासुधाहारासुधात्मिका॥३६॥राजनीतिस्त्र

यीवार्तादंडिनीतिःक्रियावति॥सद्भक्तिस्ता
रीणीश्रद्धासद्भूतिःस्तसरायणा॥३७॥सिं
धुर्मंदाकिनीगंगायमुनाचसरस्वती॥गोदा
वरीविपाशाचकावेरीचशतद्रुका॥३८॥शर
यूश्चंद्रभागाचकौशिकीगंडिकीशिवा॥नर्म

स॰

दाकर्मनाशाच चर्मण्वती च वेदिका॥३९॥
वेत्रवती वितस्ता च वरदा वरवाहिनी॥ सतीप
तिरता साध्वी सुचक्षुः कुंडवासिनी॥४०॥ एक
चक्षुः सहस्राक्षी सुश्रोणी भगमालिनी॥ से
नाश्रेणी पताका च सव्यूहा युद्धकांक्षिणी॥४१॥

११

सह॰

११

पताकिनी दयारंभा विपंचिपंचमप्रिया॥ परा
परकलाकांता त्रिशक्तिर्मोक्षदायिनी॥४२॥
ऐंद्री माहेश्वरी ब्राह्मी कौमारी कमलासना॥
इच्छा भगवती धेनुः कामधेनुः कृपावती॥४३॥
वज्रायुधा वज्रहस्ता चंडी चंडपराक्रमा॥ गो

भ॰ स॰

१२

रीसुवर्णवर्णाचस्थितिसंहारकारिणि॥६६॥
एकानेकामहेज्याचराल बाहुर्महा भुजा॥भु
जंगभूषणाभूषाषट्चक्रक्रमवासिनी॥६७॥१२
षट्चक्रभेदिनीश्यामाकायस्थाकायवर्जिता
॥सुस्मितासुमुखीक्षामामूलप्रकृतिरीश्वरी॥६८॥

अजाचबहुवर्णाचपुरुषार्थप्रवर्तिनी॥रक्ता
नीलासिताश्यामाकृष्णापीताचकर्बुरा॥६९॥
क्षुधातृष्णाजरावृद्धातरुणीकरुणालया॥
कलाकाष्ठामुहूर्त्ताचनिमिषाकालरूपिणी॥
॥७०॥सुवर्णरसनानासाचक्षुस्पर्शवतीरसा॥

गंधप्रियासुगंधाचसुस्पर्शाचमनोगतिः॥४९॥
मृगनाभिर्मृगाक्षीचकर्पूरामोदहारिणी॥पद्म
योनिःसुकेशीचसुलिंगाभगरूपिणी॥५०॥
योनीमुद्रामहामुद्राखेचरीखगगामिनी॥मधु
श्रीर्माधवीवल्लीमधुमत्तामदोद्धता॥५१॥मातंगी

शुकहस्ताचपुष्पबाणेक्षुचापिनी॥रक्तांबर
धरारक्तारक्तपुष्पावतंसिनी॥५२॥ॐह्रां
ह्रींह्रूंह्रैंह्रौंह्रः॥फट्रक्तांबरयैःनमःस्वा
हा॥शुक्लांबरधराधारामहाश्वेतावसुप्रिया॥
सुवेणीपद्महस्ताचमुक्ताहारविभूषणा॥५३॥
वि१

१७

कर्पूरामोदनीश्वासापद्मिनीपद्ममंदिरा॥ख
ड्गिनीचक्रहस्ताचभशुंडीपरिघायुधा॥५४॥
चापिनीपाशहस्ताचमयूरवरवाहना॥वरा
युधधराधीरावीरपानमदोत्कटा॥५५॥वसुधा
वसुधाराचजयाशाकंबरीशिवा॥विजयाचज

यंतीचवसुस्तनीशत्रुनाशिनी॥५६॥अंतर्वत्नी
देहशक्तिर्वरदावरधारिणी॥शीतलाचसु
शीलाचबालग्रहविनाशिनी॥५७॥कुमारी
वसुपर्वीचकामाक्षाकामवंदिता॥जालंधर
धरानंताकामरूपनिवाशिनी॥५८॥कामरू

पवतीसत्यासत्यधर्मपरायणा॥स्थूलमार्गस्थि
तासूक्ष्मासुक्ष्मबुद्धिप्रबोधिनी॥५९॥षट्को
णाचत्रिकोणचत्र्यक्षात्रिपुरसुंदरी॥वृषप्रियावृ
षारूढामहिषासुरघातिनी॥६०॥शुंभदर्पहरा
दृप्तादीप्तपावकलोचना॥कपालभूषणाकाली

कपालवरधारिणी॥६१॥कपालकुंडलीदीर्घा
शिवदूतीघनस्तनी॥सिद्धिदाबुद्धिदानित्यासत्
त्यमार्गप्रबोधिनी॥६२॥कंबुग्रीवावसुमती
छत्रछायाकृतालया॥अंतर्गर्भाकुंडलिनी
भुजंगाकारशायिनी॥६३॥प्रोल्लसत्पद्महस्ता

भ: स:

१६

वनाभिनालपद्मशालिनी॥मूलाधारानिराकारा
वन्हिकुंडकृतालया॥६४॥वायुकुंडसुखासीना
निराधारानिराश्रया॥वल्लीतंतुसमुत्थानाषड्
सास्वादुलोलुपा॥६५॥श्वासोच्छ्वासगतिर्जीवाग्रा
हिनीवन्हिसंश्रया॥तपस्विनीतपःसिद्धिस्तापसी

१६

चतपःप्रिया॥६६॥तपोनिष्ठातपोयुक्तातपसः
सिद्धिदायिनी॥सप्त धातुमयीमूर्तिःसप्तधा
त्वंतराश्रया॥६७॥देहपुष्टिर्मनस्तुष्टिरन्नपु
ष्टिर्बलोद्धता॥औषधीवैद्यमाताचद्रव्यश
क्तिःप्रभावती॥६८॥वैद्यविद्याचिकित्साच

सुपथ्यारोगनाशिनी॥ मृगयामृगमांसादामृग

स्कंधमृगलोचना॥६९॥ वागुराबद्धपाशाचब

द्धरूपावधोधना॥ बंदिबंदिस्तलाकाराकारा

बंधविमोचनी॥७०॥ शृंखलाकलहाविधुत्व

द्दठबंधविमोक्षणी॥ अंबिकाबालिकाबाला

वत्स्यासाधुजनार्चिता॥७१॥ कौलिकीकुल

विद्याचसुकुलाकुलपूजिता॥ कालचक्र

भ्रमिभ्रांतविभ्रांनाभ्रांतिनाशिनी॥७२॥

वात्याली मेघमालाचसुवृष्टिःसस्यवर्धि

नी॥ अकाराचईकाराचउकारोंकाररूपिणी॥

॥७३॥ह्रीकाराख्यबीजरूपा च क्लिंकारांबरवा
सिनी॥सौःकाराख्यपराशक्तिर्बालात्रिपुर
सुंदरी॥७४॥सर्वाक्षरमयीशक्तिरक्षरार्ण
वमालिनी॥सिंदूरारुणवर्णा च सिंदूरतिल
कप्रिया॥७५॥वश्या च वश्यबीजा च लोक

वश्यविधायिनी॥नृपवश्या नृपैःसेव्या नृप
वश्यकरीप्रिया॥७६॥महिषीनृपमान्या च नृ
पाज्ञा नृपनंदिनी॥नृपधर्ममयी विद्याधन
धान्यविवर्द्धनी॥७७॥चतुर्वर्णमयीशक्ति
श्चतु र्वर्णैश्च पूजिता॥सर्व

१८

धर्ममयी शान्तिश्चतुराश्रमवासिनी ॥७८॥ ब्रा
ह्मणी क्षत्रिया वैश्या शुद्रा चवरवर्णजा ॥ वे
दमार्गरता यज्ञा वेदविद्याविभावनी ॥७९॥ अ
स्त्रशास्त्रमयी विद्या वरशस्त्रास्त्रधारिणी ॥
सुमेधा सत्यमेधा च भद्रकाल्यपराजिता ॥८०॥

गायत्री सत्कृतिः संध्या सावित्री त्रिपदाश्रया ।
। त्रिसंध्या त्रिपदा धात्री सुपथ्या सामगायिनी ॥
॥८१॥ पंचाली कालिका बाला बालक्रीडा सना
तनी ॥ गर्भाधारधरा शून्या गर्भाश्रयनिवा
सिनी ॥८२॥ सुरारिघातिनी कृत्या पूतनाचति

लोत्तमा॥लज्जा सरस्वती नंदा भवानी पाप
नाशिनी॥८३॥पट्टांबरधरा गीतिः सुगीतिर्गा
नगोचरा॥सप्तस्वरमयी तंत्री षड्जमध्यमधै
वता॥८४॥मूर्छना ग्रामसंस्थाना स्वरस्था स्वस्था
नवासिनी॥८५॥चौंडा चामुंडा कुमारी महादेवी वैष्णवी कु
अट्टाट्टहासिनी प्रेता प्रेतासननिवासिनी॥

लपुत्रिका॥गीतनृत्यप्रिया कामा तुष्टिदा पुष्टिदा
क्षमा॥८६॥निष्ठा सत्यप्रिया प्राज्ञा लोके शा च सु
रोत्तमा॥सविषा ज्वालिनी ज्वाला विषमोहार्ति
नाशिनी॥८७॥विषारिर्नागदमनी कुरुकुल्लामृ
तोद्भवा॥भूतभीतिहरा रक्षा भूतावेशविभाविनी॥

॥८८॥रक्षोघ्नीराक्षसीरात्रिर्दीर्घनिद्रादिवागतिः॥
चंद्रिकाचंद्रकांतिश्चसूर्यकांतिर्निशाचरी॥८९॥
डाकिनीशाकिनीशिक्षाहाकिनीचक्रवर्तिनी॥
शिवाचीवप्रियाखंगासकलावनदेवता॥९०॥गुरू
रूप धरागुर्वीमृत्युमारीविशारदा॥महामारीवि

निद्राचतंद्रामृत्युविनाशिनी॥९१॥चंद्रमंडलसं
काशाचंद्रमंडलवर्तिनी॥अणिमादिगुणोपेता
सुस्पृहाकामरूपिणी॥९२॥अष्टसिद्धिप्रदाप्रौढा
दुष्टदानवघातिनी॥अनादिनिधनापुष्टिश्चतुर्बा
हुश्चतुर्मुखी॥९३॥चतुराब्धिशायाचांनाचतुर्वर्ग

फलप्रदा॥काशपुष्पप्रतीकाशाशारत्कुमुदलोचना॥१४॥भूतभव्यभविष्याचशैलजाशैलवासिनी॥
 वाममार्गरतावामाशिववामांगवासिनी॥१५॥वामाचारप्रियातुष्टिर्लोपामुद्राप्रबोधिनी॥भूतात्मा
परमाचभूतभावविनाशिनी॥१६॥मंगलाचसु

शीलाचपरमार्गप्रबोधिनी॥दक्षाचदक्षिणा
मूर्त्तिस्सुदीक्षाचहरिप्रिया॥१७॥योगिनीयोग
युक्ताचयोगांगध्यानशालिनी॥योगपट्टधराम्
मुक्ता नांपरमागतिः॥१८॥नारसिंहीसुजन्माच
त्रिवर्गफलदायिनी॥धर्मदाधनदाचैवकाम

दामोक्षदा द्युतिः॥९९॥साक्षिणीक्षणदा दक्षा
दक्षजा कोटिरूपिणी॥क्रतुः कात्यायनी स्वस्था
स्वछंदा चक्रविप्रिया॥१००॥सत्यागमा बहिस्थ
चका व्यशक्तिः कवित्वदा॥मेनापुत्री सती पा
त्री मैनाकभगिनी तडित्॥१॥सौदामिनी सुध

र्मी च सुधामा धामशालिनी॥सौभाग्यदायिनी
द्यौश्च सुभागा द्युतिवर्धिनी॥२॥ह्रीं श्रीं श्वहृत्ति
वसना ह्लनिका कलिनाशिनी॥ॐ श्रीं ह्रीं ह्लति
काकलनाशिन्यै नमः॥स्वाहा॥रक्तबीजवधो
द्रिक्ता सुतंतुर्बीजसंततिः॥३॥जगज्जीवा जग

रवीजाजगत्रयहितैषिणी॥ चामीकररुचिः चां
ड्रिसाक्षाघ्याषोडशीकला॥ ६॥ यक्षसदानुबा...च
यक्षिणीधनदार्चिता॥ चित्रिणी चित्रमायाच
विचित्राभुवनेश्वरी॥ ५॥ चामुंडामुंडहस्ताचचं
डमुंडवधोद्यता॥ अष्टम्येकादशीपूर्णानवमी

चचतुर्दशी॥ ६॥ अमाकुलचाहस्ताचपूर्णकुं
भधराधरा॥ अभिरुभैरवीभीराभीमात्रिपुर
भैरवी॥ ७॥ महाचंडाचरौद्राचमहाभैरवपू
जिता॥ निसुंडाहस्तिनीचंडाकरालदशनान
ना॥ ८॥ करालाविकरालाचघोराघर्घरनाद

भ. स.

२५ २५

नी॥रक्तदंतोर्ध्वकेशी च बंधूककुसमेक्षणा॥९॥
कादंबरीपलाशा च काश्मिरीकुंकुमप्रिया॥
कांतिर्बहुसुवर्णा च रतिर्बहुसुवर्णदा॥१०॥
मातंगिनी वरारोहा मत्तमातंगगामिनी॥हंसा
हंसगतिर्हंसी हंसोज्वलशिरोरुहा॥११॥पू

र्णचंद्रमुखी श्यामास्मिता शांता च कुंडला॥
मषी च लेखिनी लेख्या सुलेखा लेखकप्रिया॥
॥१२॥शं खिनी शंखहस्ता च जलस्था ज
लदेवता॥कुरुक्षेत्रावनिका शी मथुरा कांसवं
तिका॥१३॥अयोध्याद्वारकामाया तीर्था तीर्थ

श्री॰ स॰

करिप्रिया॥ त्रिपुष्करा प्रमेया च कोशस्था कोशवासिनी॥१४॥ कौशिकी च कुशाक्षी कोशांवा

२६

कोशवर्द्धिनी॥ कोशदा पद्मकोशाक्षी कुसुंभकुसुमप्रिया॥१५॥ तोतुला च तुला कोटि कूटस्था कोटराश्रया॥ स्वयंभूः स्वस्वरूपा च सुरूपा रू

२६

पवर्द्धिनी॥१६॥ तेजस्विनी सुभिक्षा च वरदा फलदायिनी॥ महाकेशी महागर्ता बुद्धिः सदसदात्मिका॥१७॥ महाग्रहहरा सौम्या विशोका शोकनाशिनी॥ सात्विकी सत्वसंस्था च राजसी राजसावृता॥१८॥ तामसी च तमोयुक्ता गुणत्र

यविभाविनी॥ अव्यक्ताव्यक्तरूपा च वेदविद्या
च त्रां श्रवी॥१९॥ कल्याणी शांकरी कल्याम न:
संकल्पसंततिः॥ सर्वलोकमयी शक्तिः सर्वश्रव
णगोचरा॥२०॥ सर्वज्ञानमयी वांछा सर्वतत्त्व
प्र बोधिनी॥ जाग्रतिश्च सुसुप्तिश्च स्वप्नावस्था

तुरीयका॥२१॥ त्वरा मंदगतिर्मंदा मदिरामोदमो
दिनी॥ पानभूमिः पानपात्रा पानदानकरोद्यता
॥२२॥ अघूर्णारुणनेत्रा च किंचिद्व्यक्तमा
षिणी॥ आशापुरी च दीक्षा च दक्षा दीक्षितपू
जिता॥२३॥ नागवल्ली नागकन्या भोगिनी भो

भ. सह

२८

गव ल्लभा॥सर्वेरगस्यवती विधासुस्मतिर्धर्मवा
दिनी॥२४॥श्रुतिस्मृतिधराजेष्टापानाळवासिनी
॥मिमांसा तर्कविद्याचभक्तिगश्रेष्टा सेस्य
वल्लभा॥२५॥सुनाभियोननालिंगिर्गश्रीराभा
रवर्जिता॥नागपाशधरामूर्तिनागंगानागकुं

२८

डला॥२६॥सुचक्राचक्रमध्यस्थाचक्रकोणनिवा
सिनी॥सर्वमंत्रमयी विद्यासर्वमंत्राक्षरावरा॥२७
मधुश्रवास्यवंतीचभ्रामरीभ्रमराळीका॥मा
तमंडलमध्यस्थामातमंडलवासिनी॥२८॥
कुमारीजननीकूरासुमुखीज्वरनाशिनी॥

अतिताविद्यमानाश्च भाविनीप्रीतिमंजरी॥२९॥
सर्वसौख्यवती शान्तिराहारपरिणामिनी॥ निदा
नंपंचभूतानांभवसागरतारिणी॥३०॥ अक्रू
राचग्रहवती विग्रहा गहवर्जिता॥ रोहिणी
भूतगर्भाचकालभूः कालवर्त्तिनी॥३१॥ क

लंकलहिनानारिश्चतुःषष्ट्याभिदायिनी॥ ॐ श्री
ह्रीं क्लीं लोकसंहारहितायेनमः॥ स्वाहा॥ जीर्णा च
जीर्णवस्त्रा च नूतनानववल्लभा॥३२॥ अजरा च र
तिः प्रीतिः रतिरागविवर्द्धनी॥ पंचवातगतिर्भिन्ना
पंचश्लेष्माश्रयाधरा॥३३॥ पंचपित्तवतीशक्तिः

भ. स.

२.

पंचस्थानविभाविना॥ जदन्याच अथस्यंतीश्रु
तःप्रश्रवतीनीहि॥२४॥ रजःशुक्रधरात्रा त्रिजरा
युर्गर्भधारिणी॥ त्रिकालज्ञा त्रिलिंगा च त्रिमूर्त्तिः
पुरवासिनी॥२५॥ अरागा शिवतत्वा च कामतत्वा
नुरागिणी॥ प्राच्यवाचीप्रतिचीच दिगुदीचीविदि
गिरा॥२६॥ अहंकृतिरहंकारा बलिमाया बलि
प्रिया॥ स्रुकू स्रुवा सामिधेनी च सुश्रद्धाश्राद्धदेव
ता॥२७॥ माता मातामही तृप्तिः पितृमाता पि
तामही॥ स्नुषा दौहित्रिणी पुत्री पौत्री नप्त्री स्व
सा प्रिया॥२८॥ स्तनदा स्तनधारा च विश्वयोनिः

भा॰ स॰

स्तनं धयी॥त्रिश्रत्संगधरा दोलादोला क्रीडा

भिनंदिनी॥३१॥उर्वशी कदली केकाविशिखा

शिखिनर्त्तिनी॥खड्गांगधारिणी खड्गबाणपुं

खानुवर्त्तिनी॥७०॥लक्ष्माप्रासिकरा लक्षा अल

क्षा ज्ञुल्लिलक्षणा॥वर्त्तिनी सुपथाचारा परिखा

३१ ३१

चनिवर्तिनी॥७१॥ललितामांसलातन्वीवेदवेसं

गधारिणी॥नरासृक्पानमत्ता च नरमुंडास्थि

भूषणा॥७२॥अक्षक्रीडारति सारिसारिका शु

कभाषिणी॥शांबरी गारुडी विद्यावारुणी व

रुणार्चिता॥७३॥ॐ वां वीं वूं वैं वौं वः॥वाराहे

भ॰

नमः॥स्वाहा॥वारा हीतुंडा स्लाचदंष्ट्रो द्धृतवसुं

धरा॥मीनमूर्त्तिधरामूर्त्तिवदान्याप्रतिमाश्रया

॥७४॥अमूर्त्ता निधिरूपा च शालि ग्राम शिला शु

चिः॥स्मृतिः संस्काररूपा च सालंकार च संस्मृतिः॥

॥७५॥प्राकृता देवभाषा च गाथा गीतिः प्रहेलिका॥

स॰

३२

ॐ सां सीं सूं सैं सौं सः॥सुषुण्मायै नमः॥स्वाहा॥

इडा च पिंगला पिंगा सुषुम्ना

सूर्यवाहिनी॥७६॥शशिस्रवा च ना लुस्थाका

मिनी मृतजीविनी॥अनुरूपा बहुरूपा लघुरू

पा गुरुः स्थिरा॥७७॥स्थावरा जंगमा देवीकृत

भ.

स.

कर्मफलप्रदा॥ विषयाक्रांतलोका च निर्विषाया
जितेंद्रिया॥६८॥ चित्स्वरूपा चिदानंदा परब्रह्म
प्रबोधिनी॥ निर्विकारा च निर्वैरा विरतिः सत्यव
र्द्धिनी॥६९॥ पुरुषत्राप्रभिन्ना च क्षांतिः कैवल्य
दायिनी॥ ॐ ऐं क्लीं ह्रीं श्रीं अंतरिक्षगामिन्यै महा

यक्षिण्यै नमः॥५०॥ विविक्तसेविनी प्रज्ञाजननी
ता च बहुश्रुता॥७०॥ निरीहा च समस्तैका सर्व
लोकैकसेविता॥ सेवा सेव्या प्रिया सेव्या सेवा
फलविवर्द्धनी॥७१॥ कलौ कल्किप्रिया कौला दु
ष्टम्लेंछविनाशिनी॥ प्रत्यंचा च धनुर्यष्टिः खड्ग

भ॰ ३८

धाराधरारथा॥५२॥अश्वप्लुतिश्चवल्गाचसूरणे॥सामंत्त्ववारणे॥वीरसूर्वीरमाताचविरश्रीर्विरनंदिनी॥५३॥जयश्रीर्जयदीक्षाचजयदाजयवर्धिनी॥सौभाग्यासुभगाकारासत्यसौभाग्यवर्धिनी॥५४॥क्षेमंकरीसिद्धरूपासत्कीर्तिपथि

स॰ ३७

देवता॥सर्वतीर्थमयीमूर्तिः सर्वदेवमयीप्रभा॥॥५५॥सर्वसिद्धिःपराशक्तिःसर्वमंगलदेवता॥सर्वमंगलदेवतायैनमः॥५५॥इदंनामसहस्रंतुशिवायाःशिवभाषितं॥५६॥यःपठेत्प्रातरुत्थायशुचिर्भूत्वासमाहितः॥यश्चापिशृणुयान्नि

भा॰ स॰

त्यंनरोनिश्चलमानसः॥५७॥एककालंद्विकालं
वात्रिकालंश्रद्धयान्वितः॥सर्वदुःखविनिर्मुक्तोध
नधान्यसुतैर्वृतः॥५८॥तेजस्वीबलवान्शूरोऽशो

३५ ३५

करोगविवर्जितः॥यशस्वीकीर्त्तिमान्धन्यःसु
भगोलोकपूजितः॥५९॥रूपवान्गुणसंपन्नः

प्रभावीर्यसमन्वितः॥श्रेयांसिलभतेनित्यंनि
श्चलांचशुभांश्रियं॥६०॥सर्वपापविनिर्मुक्तो
लोभक्रोधविवर्जितः॥नित्यंबंधुसुतैर्दारैःपु
त्रपौत्रमहोत्सवैः॥६१॥नंदितःसेव्यतेभृत्यै
बहुभिःशुद्धमानसैः॥विद्यानांपारगोविप्रः

भ. स.

क्षत्रियो विजयी भवेत्॥ ६२॥ वैश्यश्च धनलाभा
ढ्यो शूद्रश्च सुखमाप्नुयात्॥ पुत्रार्थी लभते पु
त्रान् धनार्थी लभते धनं॥ ६३॥ इच्छाकामांस्तु का
मार्थी धर्मार्थी धर्ममक्षयं॥ कन्यार्थी लभते कन्यां
रूपशीलगुणान्वितां॥ ६४॥ क्षेत्रं तु बहुसस्याढ्यं

३९ ३९

गावश्च बहुदुग्धदाः॥ नाशुभं नापदं तस्य न भ
यं नृपशत्रुभिः॥ ६५॥ जायते नाशुभा बुद्धिर्ल
ते कुलधर्षितां॥ न बाध्यंते ग्रहास्तस्य भूतभवं
च भंजकाः॥ ६६॥ न पिशाचा न डाकिन्यो भयं
तस्य न शास्तुतः॥ बालग्रहाभिभूतानां बालानां

शांतिकारकं॥६७॥द्वंद्वानांप्रीतिभेदेनमैत्रीकर
णमुत्तमं॥लोहपाशैर्दृढैर्बद्धोबंदीवेश्मनिदुर्ग
मे॥६८॥तिष्ठन्पठन्स्मरन्मर्त्योमुच्यतेनात्र
संशयः॥दाराणांन्चपुत्राणांबंधूनांन्चमि
त्रजं॥६९॥पश्यंतिनचतेशोकंवियोगंचिरजीवि

नः॥७०॥अंधस्तुलभतेदृष्टीनेत्ररोगैर्नबाध्यते॥
बधिरःश्रुतिमाप्नोतिमूकोवाचंशुभांनरः॥७१॥
पतद्गर्भाचयानारीस्थिरगर्भाचजायते॥कुष्टि
नःशीर्णदेहायेगतकेशानखत्वचः॥७२॥पठना
च्छ्रवणाच्चास्यदिव्यकायाभवंतिते॥येपठंतिश

भ०

२८

तावर्तंस्तु चिषमंनो जितेंद्रियं ॥७३॥ अपुत्रा प्राप्नुयुः
पुत्रांघृण्वंतोपिन संशयः ॥ महाव्याधिपरिग्रस्ता
स्तपापैर्विविधैर्ज्वरैः ॥७४॥ भगनाभिषंगसंजा
ते चातुर्थिकतृतीयकैः ॥ अन्येश्च दारुणैरोगैःपी
ड्यमानाश्च मानवः ॥७५॥ गतबाधाश्च जायंते

स०

२८

तैर्मुक्तानात्रसंशयः ॥ श्रृंतिग्रंथधरोबालोदिव्य
वादिकविश्वरः ॥७६॥ पठणाद्भवणाद्वापिभ
वंस्येवनसंशयः ॥ अष्टम्यांच चतुर्दश्यां नवम्यां
चैकचेतसा ॥७७॥ येपठंति सदामर्त्या नतेवै
दुखभागिनः ॥ नवत्रंजिताहारोदृढबुद्धिर्जि

तेंद्रियः॥७८॥चंडिकायतने विद्वान्नूस्तुचिष्मास्तु
तिसन्निधौ॥एकाकीचत्रानावर्तंपठन्धीरस्थ
निर्भयः॥७९॥साक्षाद्भगवनीतस्मैप्रयछेदी
प्सितंफलं॥सिद्धपीठेगिरौरम्येसिद्धिक्षेत्रेसुरा
लये॥८०॥पठतःसाधकस्येहंसिद्धिर्भवतिवां

छितं॥दत्त्वावर्त्तंपठेन्नित्यंभूमिशायीनरश्शुचि
॥८१॥स्वप्नेमूर्त्तिमयींदेवींवरदांसोपिपश्यय
ति॥अवर्त्तनसहस्त्रैर्येजपंतिपुरुषोत्तमा॥८२॥
तेसिद्धासिद्धिदालोकेशापानुग्रहणेक्षमा॥
केवित्तेसंस्कृतेतेषांशास्त्राएणंव्याकृतैनथा॥

प्र.　　　　　　　　　　　　　　　　स.

६०

॥८३॥ शक्तिः प्रोन्मीलिते तेषु नाधीते तेपि भार
ती॥ नखराग शिरोरत्न द्विगुणीकृत रोचिषः॥
८४॥ प्रयच्छंतोपि सर्वस्वं सेवंते त्वं महेश्वरः॥ रो
चनालिखितं भूर्जे कुंकुमेन शुभे दिने॥८५॥ धा
रयेद्यंत्रितं देहे पूजयित्वा कुमारिकाः॥ विप्रांश्च

६०

वरनारीश्च धूपैः कुसुमचंदनैः॥८६॥ क्षीरखंडा
ज्यभोज्यानिः भोजयित्वा सुभाषितां॥ बध्नंति
ये महारक्षां बालानां च विशेषतः॥८७॥ भवंति
न्यपत्यास्ते कीर्तिभाजो यशस्विनः॥ नरानु
भ्यो भयं तेषां दुर्जनेभ्यो नराजितः॥८८॥ नच

स॰ ५१

दाराभिर्वारादिनदारिद्र्यंनदुर्गतिः॥ महार्णवे महानद्यांपोतस्थोपिनभीःक्वचित्॥८९॥ रणे च्छलेविवाहेचविजयंप्राप्नुवंतिते॥ नृपाश्चवश्यतांयांतिनृपमान्याश्चयेनमः॥९०॥ सर्वत्रपूजितालोकेबहुमान्पुरःसराः॥ रतिराग

विदग्धाश्चविव्हलाःकामपीडिता॥९१॥ यौवनाक्रांतदेहास्तान्सेवंतेवामलोचनाः॥ लिखितं मूर्ध्निकंठेवा धारयेद्येरणे॥९२॥ चालधायुध्यमानंतुप्रतियोद्धानपश्यति॥ केतौवादुंदुभौ येषांतिष्ठेद्वैलिखितंरणे॥९३॥ मायासैन्यंपरि

भ॰ स॰

४२

प्रस्तान्नकंदिशीकान्हतौजसः॥ निवृत्तान्वादि
रूढांश्च रास्त्रवस्य विवर्जितान्॥१४॥ निर्जि
तारातुसंघातान्नलोभते विजयंध्रुवं॥ नापि ४२
चारानपात्राश्च वाणवीरादिकीलि कं॥१५॥
डाकिनीपूतनाल्ल्ख्यामहामारीचशाकिनी॥ ऋ

भवानीसहस्त्रनामस्तोत्रंसंपूर्णमस्तु॥
श्रीरस्तु॥ श्रीभवानीचांकरार्पणमस्तु॥ प
त्रसंख्या॥ पंचेताळीस॥४५॥ हस्तअक्षर
भवानीभटघोपटे॥ हेपुस्तकपांडुरंगविष्णु
स्याहाव्हेसस्य॥४॥ शाके १७२५ रुधिरुद्गारिना॥

भ॰ ७५ स॰

मसंवत्सरे आश्विन वध अष्टमी भृगुवारे त्त
द्दिने इदं पुस्तकं भवानि सहस्त्रनाम समाप्तः
॥कुलदैवत मातापुर निवासिनीयनमः॥तै
लात् रक्षे जलात्रक्षे रक्षे शीतल बंधनात्॥मुर्ख
हस्ते यदातव्यं एवं वदति पुस्तकं॥१॥

भ॰ ७६ स॰

भग्नपृष्ठि कटिग्रीवस्तब्धदृष्टिरधोमुखं॥
कष्टेन लिखितं ग्रंथं यत्नेन प्रतिपालयेत्॥
॥२॥भवानि सहस्त्रनाम॥समाप्तः॥

भ.

४६ ॥ हेपुस्तकभवानिसहस्त्रनामसमाप्तः ॥ ४६

भ.